# श्री दुर्गा चंडी पाठ
# Shri Durgâ Chandi Paath



Aashram

Voor meer informatie over dit boek kunt u terecht bij
Acharya Shankar Upadhyay Ji
Oukoop 12
3626 AW Nieuwen ter Aa
Telefoon: 06-47334747 / 06-47988086
email: sanatan@hotmail.com of srpsan@live.nl

Stichting Shri Sanatan Dharma Nederland
Ashram Shri Dutcheswar Dhaam
www.muhurta.nl
ANBI/RSIN: 819971029
KvK: 01138125

## Inhoudsopgave

1. कवचम् Kavacam
2. अर्गला स्तोत्रं Argalâ stotram
3. कीलकं स्तोत्रं Kilakam stotram
4. तन्त्रोक्तं रात्रि सूक्तं Tantroktam Ratri suktam
5. नवारण विधि Navâran vidhi
6. ध्यानं Dhyânam
7. सप्तश्लोकी दुर्गा Saptasloki Durga
8. देवी अपराध क्षमा स्तोत्र Devi kshama stotram
9. भगवती स्तोत्रं Bhagvati stotram
10. भवानी अष्टकम Bhavani Ashtakam
11. दुर्गा चालीस Durga Chalisa
12. दुर्गा आरती Durga Aarti

## श्री दुर्गा कवचम्
## Shrî Durgâ Kavacam,

विनियोग

**ॐ अस्य श्री चण्डी कवचस्य ब्रह्मा ऋषिः अनुष्टुप् छन्दः चामुण्डा देवता अंगन्या सोक्त मातरो बीजम् दिग्बन्ध देवता, स्तत्त्वम् श्रीजग दम्बा प्रीत्यर्थे सप्तशती पाठां गत्वेन जपे विनियोगः ।**

*viniyogaha*
*OM asya shrî candî kavacasya ,brahmâ rishiha, anushtup chhandaha, câmundâ devatâ, anganyâsokta mâtaro bîjam, digbandha devatâ, stattvam shrîjagadambâ prîtyarthe, sapta shatî pâthân gatvena jape viniyogaha.*

**॥ ॐ नमश्चण्डिकायै ॥**

*ÔM namash candikâyai*

**मार्कण्डेय उवाच**

**ॐ यद्गुह्यं परमं लोके सर्व रक्षा करं नृणाम् ।**
**यन्न कस्य चिदा ख्यातं तन्मे ब्रूहि पितामह ॥ [१]**

*Mârkandeya uvâca:*
*Om yadguhyam paramam loke sarva rakshâ karam nrinâm*
*yanna kasya cidâ khyâtam tanme brûhi pitâmaha.1*

**ब्रह्मोवाच**

**अस्ति गुह्यतमं विप्र सर्व भूतो पकारकम् ।**
**देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥ [२]**

*Brahmovâca*
*asti gûhya tamam vipra sarva bhûto pakârakam,*
*devyâstu kavacam punyam tacch rinushva mahâmune. 2*

प्रथमं शैलपुत्री च द्वितीयं ब्रह्म चारिणी ।
तृतीयं चन्द्र घण्टेति कूष्माण्डेति चतुर्थकम् ॥ [३]

*Prathamam shailaputrî ca dvitîyam brahmacârinî*
*tritîyam candraghanteti kûshmândeti caturtakam. 3*

पंचमं स्कन्द मातेति षष्ठं कात्यायनीति च ।
सप्तमं कालरात्रीति महा गौरीति चाष्टमम् ॥ [४]

*pañcamam skanda mâteti shashtham kâtyâyanîti ca*
*saptamam kâla râtrîti mahâ gaurîti câshtamam. 4*

नवमं सिद्धि दात्री च नवदुर्गाः प्रकीर्तिताः ।
उक्तान्ये तानि नामानि ब्रह्मणैव महात्मना ॥ [५]

*navamam siddhi dâtrî ca navadurgâ pra kîrtitâha,*
*uktânye tâni nâmâni brahmanaiva mahâtmanâ. 5*

अग्निता दह्य मानस्तु शत्रु मध्ये गतो रणे ।
विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥ [६]

*agninâ dah yamânastu shatru madhye gato rane*
*vishame durgame caiva bhayârtâh sharanam gatâh. 6*

न तेषा जायते किंचिद शुभं रण संकटे ।
नापदं तस्य पश्यामि शोक दुःख भयं न हि ॥ [७]

*na teshaam jâyate kiñcida shubham rana samkate*
*nâpadam tasya pashyâmi shoka duhkha bhayam na hi. 7*

यैस्तु भक्त्या स्मृता नूनं तेषां वृध्दिहः प्रजायते ।
ये त्वां स्मरन्ति देवेशि रक्षसे तन्न संशयः॥ [७]

*yaistu bhaktyâ smritâ nûnam teshâm vriddhih prajâyate*
*ye tvân smaranti deveshi rakshase tann samshayah. 8*

प्रेत संस्था तु चामुण्डा वाराही महिषा सना ।

ऐन्द्री गज समानरूढा वैष्णवी गरुडासना ॥
*Preta samsthâ tu câmundâ vârâhî mahishâ sanâ*
*aindrî gaja samârudhâ vaishnavî garudâsanâ. 9*
माहेश्वरी वृषारूढा कौमारी शिखि वाहना ।
लक्ष्मीः पद्मा सना देवी पद्म हस्ता हरि प्रिया ॥ [१०]
*mâheshvarî vrishârudhâ kaumârî shikhi vâhanâ*
*lakshmîh padmâsanâ devî padma hastâ hari priyâ. 10*
श्वेत रूप धरा देवी ईश्वरी वृष वाहना ।
ब्राह्मी हंस समा रूढा सर्वा भरणभूषिता ॥ [११]
*Shveta rûpa dharâ devî îshvarî vrisha vâhanâ*
*brâhmî hamsa samâr udhâ sarvâ bharana bhûshitâ. 11*
इत्येता मातरः सर्वाः सर्व योग समन्विताः।
नाना भरण शोभाढ्या नाना रत्नोप शोभिताः ॥ [१२]
*ityetâ mâtarah sarvâh sarva yoga samanvitâh*
*nânâ bharana shobhâdhyâ nânâ ratnopa shobhitâha.*
दृश्यन्ते रथमारूढा देव्यः क्रोध समाकुलाः ।
शंखां चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥ [१३]
*drishyante ratha mârudhâ devyaha krodha samâkulâha*
*shankhâm cakram gadâm shaktim halam ca musalâyudham 13*
खेटकं तोमरं चैव परशुं पाशमेव च ।
कुन्ता युधं त्रिशूलं च शार्ंगमा युध मुत्तमम् ॥ [१४]
*khetakam tomaram caiva parashum pâshameva ca*
*kuntâ yudham trishûlam ca shâranga mâyudha muttamam. 14*
दैत्यानां देह नाशाय भक्तानाम भयाय च ।
धारयन्त्या युधानीत्थं देवानां च हिताय वै ॥ [१५]
*daityânâm deha nâshâya bhaktânâma bhayâya ca*
*dhârayantyâ yudhânîtham devânâm ca hitâya vai. 15*

नमस्तेऽस्तु महा रौद्रे महा घोर पराक्रमे ।
महाबले महोत्साहे महा भय विनाशिनि ॥ [१६]

*Namas testu mahâ raudre mahâ ghora parâ krame*
*mahâbale mahotsâhe mahâ bhaya vinâshini. 16*

त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भय वर्धिनि ।
प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ॥ [१७]

*trâhi mâm devi dush prekshye shatrûnâm bhaya vardhini*
*prâcyâm rakshatu mâmaindrî âgney yâmagni devatâ. 17*

दक्षिणे ऽवतु वाराही नैर्ऋत्यां खड्ग धारिणी ।
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥ [१८]

*dakshine avatu vârâhî nairrityâm khadga dhârinî*
*pratîcyâm vârunî rakshed vâyavyâm mrigavâhinî. 18*

उदीच्यां पातु कौमारी ऐशान्यां शूल धारिणी ।
ऊर्ध्वं ब्रह्माणि मे रक्षेद धस्ताद् वैष्णवी तथा ॥ [१९]

*udîcyâm pâtu kaumârî aishânyâm shûla dhârinî*
*ûrdhvam brahmâni me raksheda dhastâd vaishnavî tathâ. 19*

एवं दश दिशो रक्षेच्चामुण्डा शव वाहना ।
जया में चाग्रतः पातु विजया पातु पृष्ठतः ॥ [२०]

*evam dasha disho raksheccâmundâ shava vâhanâ*
*jayâ mem câgratah pâtu vijayâ pâtu prishthatah*

अजिता वामपार्श्वे तु दक्षिणे चापराजिता ।
शिखा मुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥[२१]

*ajitâ vâma pârshve tu dakshine câparâjitâ*
*shikhâ mudyotinî rakshedumâ mûrdhni vyavasthitâ. 21*

माला धारी ललाटे च भ्रुवौ रक्षेद् यशस्विनी ।
त्रिनेत्रा च भ्रुवोर्मध्ये यम घण्टा च नासिके ॥ [२२]

*mâlâ dharî lalâte ca bhruvau rakshed yashasvinî*
*trinetrâ ca bhruvor madhye yama ghantâ ca nâsike*

**शंखिनी चक्षुषोर्मध्ये श्रोत्र योर्द्वार वासिनी ।**
**कपोलौ कालिका रक्षेत्कर्ण मूले च शांकरी ॥** [२३]

*shankhinî cakshushor madhye shrotra yordvâra vâsinî*
*kapolau kâlikâ rakshet karna mûle tu shânkarî*

**नासिकायां सुगन्दा च उत्तरोष्ठे च चर्चिका ।**
**अधरे चामृत कला जिह्वायां च सरस्वती ॥** [२४]

*nâsikâyâm sugandhâ ca uttaroshthe ca carcikâ*
*adhare câmrita kalâ jihvâyâm ca sarasvatî*

**दन्तान् रक्षतु कौमारी कण्ठ देशे तु चण्डिका ।**
**घण्टिकां चित्रघण्टा च महामाया च तालुके ॥** [ २५]

*dantân rakshatu kaumârî kantha deshe tu candikâ*
*ghantikâm citraghantâ ca mahâmâyâ ca tâluke*

**कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमंगला ।**
**ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥** [२६]

*kâmâkshî cibukam rakshed vâcam me sarvamangalâ*
*grîvâyâm bhadrakâlî ca prishthavamshe dhanurdharî*

**नीलग्रीवा बहिः कण्ठे नलिकां नल कूबरी ।**
**स्कन्धयोः खड्गिनी रक्षेद् बाहू में व्रजधारिणी ॥** [२७]

*nîlagrîvâ bahiha kanthe nalikâm nala kûbarî*
*skandhayoh khadginî rakshed bâhû me vajradhârinî. 27*

**हस्त योर्दण्डिनी रक्षेदम्बिका चांगुलीषु च ।**
**नखां छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥** [२८]

*Hasta yordandinî rakshed ambikâ cângulîshu ca*
*nakhâñ chûleshvarî rakshet kukshau rakshet kuleshvarî. 28*

**स्तनौ रक्षेन्महादेवी मनः शोक विनाशिनी ।**

हृदये ललिता देवी उदरे शूल धारिणी ॥ [२९]

*stanau rakshen mahâdevî manah shoka vinâshinî*
*hridaye lalitâ devî udare shûla dhârinî, 29*

नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ।
पूतना कामिका मेढ्रं गुदे महिष वाहिनी ॥ [३०]

*nâbhau ca kâminî rakshed guhyam guhyeshvarî tathâ*
*pûtanâ kâmikâ medhram gude mahishavâhinî. 30*

कट्यां भगवती रक्षेज्जानुनी विन्ध्य वासिनी ।
जंघे महाबला रक्षेत्सर्व काम प्रदायिनी ॥ [३१]

*katyâm bhagavatî rakshej jânunî vindhya vâsinî*
*janghe mahâbalâ rakshet sarva kâma pradâyinî. 31*

गुल्फ योर्नारसिंही च पाद पृष्ठे तु तैजसी ।
पादां गुलीषु श्री रक्षेत्पादा धस्तल वासिनी ॥ [३२]

*Gulpha yornârasimhî ca pâda prishthe tu taijasî*
*pâdân gulîshu shrî rakshet pâdâ dhastala vâsinî. 32*

नखान् दंष्ट्रा कराली च केशांश्चै वोर्ध्वकेशिनी ।
रोम कूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥ [३३]

*nakhân danshtrâ karâlî ca keshâmshcai vórdhva keshinî*
*róma kûpeshu kauberî tvacam vâgîshvarî tathâ. 33*

रक्त मज्जा वसा मांसान्यस्थि मेदांसि पार्वती ।
अन्त्राणि काल रात्रिश्च पित्तं च मुकुटेश्वरी ॥ [३४]

*Raktamajjâ vasâ mâmsân yasthi medâmsi pârvatî*
*antrâni kâla râtrishca pittam ca mukuteshvarî. 34*

पद्मावती पद्मकोशे कफे चूडा मणिस्तथा ।
ज्वालामुखी नखज्वालाम भेद्या सर्वसंधिषु ॥ [३५]

*padmâvatî padmakóshe kaphe cûdâ manistathâ*
*jvâlâmukhî nakha jvâlâma bhédyâ sarva sandhishu. 35*

शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ।

अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥ [३६]

*shukram brahmâni me rakshécchâyâm chatreshvarî tathâ*
*aham kâram mano buddhim rak shenme dharma dhârinî.36*

प्राणापानौ तथा व्यानमुदानं च समानकम् ।
वज्रहस्ता च मे रक्षेत्प्राणं कल्याण शोभना ॥ [३७]

*Prânâ pânau tathâ vyânam udânam ca samânakam*
*vajrahastâ ca me rakshet prânam kalyâna shobhanâ. 37*

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥ [३८]

*rase rûpe ca gandhe ca shabde sparshe ca yoginî*
*sattvam rajastamashcaiva rakshen nârâyanî sadâ. 38*

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ।
यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी ॥ [३९]

*âyû rakshatu vârâhî dharmam rakshatu vaishnavî*
*yashah kîrtim ca lakshmîm ca dhanam vidyâm ca cakrinî. 39*

गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके ।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥ [४०]

*Gotra mindrâni me rakshet pashûnme raksha candike*
*putrân rakshen mahâlakshmîr bhâryâm rakshatu bhairavî.40*

पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ।
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥ [ ४१ ]

*panthânam supathâ rakshenmârgam kshemakarî tathâ*
*râjadvâre mahâlakshmîr vijayâ sarvatah sthitâ*

रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ।
तत्सर्वं रक्ष मे देवि जयन्ती पापना शिनी ॥ [४२]

*rakshâhînam tu yatsthânam varjitam kavacena tu*
*tatsarvam raksha me devi jayantî pâpa nâshinî. 42*

पदमेकं न गच्छेतु यदीच्छेच्छुभमात्मनः ।
कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ॥ [४३]

*padamekam na gacchettu yadîcchecchubhamâtmanah*
*kavacenâvrito nityam yatra yatraiva gacchati*

तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम्
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥ [ ४४]

*tatra tatrârthalâbhashca vijayah sarvakâtmikah*
*yam yam cintayate kâmam tam tam prâpnoti nishcitam*
*paramaishvaryamatulam prâpsyate bhûtale pumân. 44*

निर्भयो जायते मर्त्यः संग्रामेष्व पराजितः ।
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥ [४५]

*nirbhayo jâyate martyaha samgrâmeshva parâjitaha*
*trailokye tu bhavetpûjyah kavacen âvritaha pumân. 45*

इदं तु देव्याः कवचं देवानामपि दुर्लभम् ।
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥ [४६ ]

*idam tu devyâha kavacam devâ nâmapi dur labham*
*yaha pathetprayato nityam trisandhyam shraddhaayânvitaha. 46*

दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः ।
जीवेद् वर्षशतं साग्रमपमृत्यु विवर्जितः ॥ [४७]

*daivî kalâ bhavettasya trailokyeshva parâjitaha*
*jîved varshashatam sâgramapa mrityu vivarjitaha. 47*

नश्यन्ति व्याधयः सर्वे लूता विस्फोटकादयः ।
स्थावरं जंगमं चैव कृत्रिमं चापि यद्विषम् ॥ [ ४८]

*nashyanti vyâdhayaha sarve lûtâ visphota kâdayaha*
*sthâvaram jangamam caiva kritrimam câpi yadvisham.48*

अभि चाराणि सर्वाणि मन्त्र यन्त्राणि भूतले ।

भूचराः खेच राश्चैव जल जाश्चोपदेशिकाः ॥ [४९]
*Abhi cârâni sarvâni mantra yantrâni bhûtale*
*bhûcarâha kheca râscaiva jala jâshcópadéshikâha. 49*

सहजा कुलजा माला डाकिनी शाकिनी तथा ।
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ॥ [५०]
*sahajâ kulajâ mâlâ dâkinî shâkinî tathâ*
*antariksha carâ ghorâ dâkin yashca mahâ balâha. 50*

ग्रह भूत पिशाचाश्च यक्ष गन्धर्व राक्षसाः ।
ब्रह्म राक्षस वेतालाः कूष्माण्डा भैरवादयः ॥ [५१]
*grahabhûta pishâcâsca yaksha gandarva râkshasâha*
*brahma râkshasa vetâlâha kûshmândâ bhaira vâdhayaha. 51*

नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ।
मानोन्नतिर्भवेद् राज्ञस्तेजो वृद्धिकरं परम् ॥ [५२]
*nashyanti darsha nâttasya kavace hridi samsthite*
*mânonnatir bhaved râjñastejo vriddhi karam param. 52*

यशसा वर्धते सोऽपि कीर्ति मण्डित भूतले ।
जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥ [५३]
*yashasâ vardhate so'pi kîrtimandita bhûtale*
*japet saptashatîm candîm kritvâ tu kavacam purâ.53*

यावद्भूमण्डलं धत्ते सशैल वनकान नम् ।
तावत्तिष्ठति मेदिन्यां संततिः पुत्र पौत्रिकी ॥ [५४]
*yâvadbhûmandalam dhatte sashaila vanakânanam*
*tâvattishthati medinyâm santatih putrapautrikî. 54.*

देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ।
प्राप्नोति पुरुषो नित्यं महा माया प्रसादतः ॥ [५५]
*dehânte paramam sthânam yatsurairapi durlabham*
*prâpnoti purusho nityam mahâmâyâ prasâdatah. 55.*

**लभते परमं रूपं शिवेन सह मोदते॥ॐ॥ [ ५६]**
*labhate paramam rûpam shivena saha modate. 56.*

*devyâh kavacam sampûrnam*

***Ohm Durgaye Namah 3x***

**ॐ**

## अथार्गलास्तोत्रम्
## Argala Stotram

**ॐ अथः अर्गला स्तोत्रं**
**ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुऋषिः अनुष्टुप छन्दः श्रीमहालक्ष्मीर्देवता श्रीजगदम्बाप्रीतये सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ॥**
*Om atha ârgalâ stotram*
*Om asya shrî argalâ stotra mantrasya, vishnur rishiha anustup chandaha, Shrî mahâ lakshmîr devatâ, shrî jagadambâ prîtaye Sapta shatî pâthân gatvena jape viniyogaha.*

**ॐ नमश्चण्डिकायै ॥**
ॐ *namashcandikâyai*
**मार्कण्डेय उवाच**
*mârkandeya uvâca*
**ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ।**
**दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥१॥**
*Om jayantî mangalâ kâlî bhadrakâlî kapâlinî*
*durgâ shivâ kshamâ dhâtrî svâhâ svadhâ namo astute. 1*

जय त्वं देवि चामुण्डे जय भूतापहारिणि ।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥२॥

*jaya tvam devi câmunde jaya bhûtâ pahârini*
*jaya sarvagate devi kâlarâtri namo astute. 2*

मधु कैटभ विद्राविं विधातृवरदे नमः ।।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥३॥

*madhu kaitabha vidrawi vidhâtri varde namaha*
*rûpam dehi jayam dehi yasho dehi dvisho jahi*

महिषासुरनिर्नाशि भक्तानां सुखदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥४॥

*Mahishâ suranir nâshi bhaktânâm sukhade namaha*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 4*

रक्तबीजवधे देवि चण्डमुण्ड विनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ५॥

*Raktabîja vadhe devi canda munda vinâshini*
*rûpam dehi jayam dehi yasho dehi dvisho jahi . 5*

शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥६॥

*Sumbhasyaiva Nishumbhasya dhrum-raakshasya cha mardini,*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 6*

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥७॥

*vanditânghri yuge devi sarva saubhâgya dâyini*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 7*

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥८ ॥

*acintya rûpa carité sarva shatru vinâshini*
*rûpam dehi jayam dehi yasho dehi dvisho jahi.  8*

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ।
रुपं देहि जयं देहि यशो देहि द्विषो जहि ॥९॥

*natébhyaha sarvadâ bhaktyâ cândike duri tâpahé*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 9*

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१०॥

*stuvad bhayo bhakti pûrvam tvâm candike vyâdhi nâshini*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 10*

चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः। ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥११॥

*Candike satatam ye tvaam archa-yantiha bhakti-taha*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 11*

देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१२॥

*dehi saubhâgyam ârogyam dehi devi param sukham*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 12*

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१३॥

*vidhehi dvishatâm nâsham vidhehi bala muccakaiha*
*rûpam dehi jayam dehi yasho dehi dvisho jahi.13*

विधेहि देवि कल्याणं विधेहि परमां श्रियम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१४॥

*vidhehi devi kalyaanam vidhehi paramam sriyam*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 14.*

सुरासुर शिरोरत्न निघृष्टचरणेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१५॥

*surâ sura shiro ratna nighrishta carané ambike*
*rûpam dehi jayam dehi yasho dehi dvisho jahi 15.*

**विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ।**
**रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १६ ॥**

*vidyâ vantam yashas vantam lakshmî vantam janam kuru*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 16*

**प्रचण्ड दैत्यदर्पघ्ने चण्डिके प्रणताय मे ।**
**रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १७ ॥**

*pracanda daitya darpaghne candike pranatâya me*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 17*

**चतुर्भुजे चतुर्वक्त्र संस्तुते परमेश्वरि ।**
**रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १८ ॥**

*caturbhuje catur vaktra samstute para meshvari*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 18*

**कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके ।**
**रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १९ ॥**

*krishnena samstute devi shash vad bhaktyâ sadâmbike*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 19*

**हिमाचल सुतानाथ संस्तुते परमेश्वरि ।**
**रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २० ॥**

*himâcala sutâ nâtha samstute para meshvari*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 20*

**इन्द्राणी पति सद्भाव पूजिते परमेश्वरि ।**
**रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २१ ॥**

*indrânî pati sad bhâva pûjite para meshvari*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 21*

**देवि प्रचण्ड दोर्दण्ड दैत्यदर्प विनाशिनि ।**
**रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २२ ॥**

*devi pracanda dórdanda daitya darpa vinashini*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 22*

**देवि भक्त जनोद्दामदत्तानन्दोदये ऽम्बिके ।**
**रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२३॥**

*devi bhakta janoddâma dattâ nando daye ambike*
*rûpam dehi jayam dehi yasho dehi dvisho jahi. 23*

**पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ।**
**तारिणीं दुर्गं संसार सागरस्य कुलोद्भवाम् ॥२४॥**

*Patnim manora mâm dehi mano vrittânu sârinîm*
*târini durga samsâra sâgarasya kulod bhavâm. 24*

**इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।**
**स तु सप्तशती संख्या वरमाप्नोति सम्पदाम् ॥२५॥**

*idam stotram pathitvâ tu mahâstotram pathennaraha*
*sa tu saptashatî sankhyâm vara mâpnoti sampadâm. 25*

*iti devyâ argalâ stotram sampûrnam*

**Ohm Durgaye Namah 3x**

# अथ कीलकम् स्तोत्रम्

## Devî Kîlakam

**ॐ अस्य श्री कीलक स्तोत्र महा मन्त्रस्य**
**शिव ऋषिः , अनुष्टुप् छन्दः, श्रीमहासरस्वती देवता,**

श्रीजगदम्बा प्रीत्यर्थं सप्तशतीपाठाङ्गत्वएन जपे विनियोगः।

*ôm asya shri kîlaka stotra mahâ mantrasya,*
*shiva rishiha, anustup chandaha, shrîmahâsarasvatî devatâ,*
*shrîjagadambâ prîtyartham, saptashatî pâthân gatvéna jape viniyogah.*

## ॐ नमश्चण्डिकायै

ॐ *namashcandikâyai*

## मार्कण्डेय उवाच

*Mârkandeya uvâca:*

ॐ विशुद्ध ज्ञानदेहाय त्रिवेदी दिव्यचक्षुषे ।
श्रेयः प्राप्ति निमित्ताय नमः सोमार्थ धारिणे ॥१॥

ॐ *Vishuddha jñâna dehâya, trivedî divya cakshushe*
*shreyaha prâpti nimittâya, namaha somârtha dhârine. 1*

सर्वमेत द्विजानी यान्मन्त्राणापि कीलकम् ।
सोऽपि क्षेममवाप्रोति सततं जाप्य तत्परः ॥२॥

*sarvameta dvijânî yân mantra nâpi kîlakam*
*so api kshema mavâpnoti satatam jâpya tatparaha. 2*

सिद्ध्यन्तुच्चाटनादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतां देवींस्तोत्रमात्रेण सिद्धयति ॥३॥

*siddhyan tuccâtanâdîni, vastûni sakalânyapi*
*etena stuvatâm devîm, stotra mâtrena siddhayati. 3*

न मन्त्रो नौषधं तत्र न किञ्चिदपि विध्यते ।
विना जाप्यम् न सिद्ध्येत्तु सर्व मुच्चाटनादिकम् ॥४॥

*na mantro naushadham tatra, na kiñcidapi vidyate*
*vinâ jâpyam na siddhyettu sarva muccâta nâdikam. 4*

समग्राण्यपि सिद्धयन्ति लोकशङ्कामिमां हरः ।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥५॥

*sama grânyapi siddhayanti, loka shankâ mimâm harah*
*kritvâ nimantra yâmâsa, sarvamevam idam shubha. 5*

स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः
समाप्तिर्न च पुण्यस्य तां यथा वन्नि मन्त्रणां ॥६॥

*stotram vai candikâ yâstu, tacca guptam cakâra saha*
*samâptirna ca punyasya, tâm yathâ vanni mantranâm. 6*

सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः ।
कृष्णायां वा चतुर्दश्याम् अष्टम्यां वा समाहितः ॥७॥

*so api kshema mavâpnoti, sarvameva na samshayaha*
*krishnâyâm vâ caturdashyâm, ashtamyâm vâ samâhitaha. 7*

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ।
इत्थंरूपेण कीलेन महादेवेन कीलितम्। ॥८॥

*Dadâti pratigrihnâti nânyataishâ prasîdati*
*Ittham rûpena kîlena mahâdevena kîlitam. 8*

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम् ।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः॥ ९॥

*yo nishkîlâm vidhâ yainâm, nityam japati samsphutam*
*sa siddhaha sa ganaha, so api gandharvo jâyate naraha, 9*

न चैवाप्यटतस्य भयं क्वापीह जायते ।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥१०॥

*Na caivâpya tatastasya, bhayam kvâpîha jâyate*
*Nâpa mrityuvasham yâti,  mrito moksha mavâpnuyât. 10*

ज्ञात्वा प्रारभ्य कुर्वीत न,कुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥ ११॥

*gjâtvâ prârabhya kurvîta na, kurvâno vinashyati*

*tato gjâtvaiva sampannam idam prârabhyate budhaih. 11*

सौभाग्यादिच यत्किञ्चिद् दृश्यते ललनाजने ।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभं ॥१२॥

*saubhâgyâ dicha yat kincid drusyaté lala nâjane*
*tat sarvam tatprasâ dena tena jâpyamidam shubham. 12*

शनैस्तु जप्य मानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः।
भवत्येव समग्रापि ततः प्रारभ्यमेवतत् ॥१३॥

*shanaistu japyamâne asmin stotre sampatti rûccakaiha*
*Bhavat yeva samagrâpi tatah prârabhya meva tat . 13*

ऐश्वर्यं यत्प्रसादेन सौभाग्या रोग्य सम्पदः।
शत्रुहानिः परो मोक्षः स्तूयते सान किं जनैः ॥ॐ॥ १४॥

*aishvaryam yat prasâdena, saubhâgyâ rogya sampadah*
*Shatru hâniha paro mokshaha, stûyate sâna kim janaiha.Om.14*

॥इति श्रीभगवत्याः कीलकस्तोत्रं समाप्तम् ॥
*Iti shrîbhagavatyâh kîlaka stotram samâptam*

**Ohm Durgaye Namah 3x**

# अथ तन्त्रोक्तंरात्रिसूक्तं
**Tantroktam Ratri Suktam**

ॐ विश्वेश्वरीं जगद्धात्रीं स्थिति संहार कारिणीम् ।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ।।१।।

*Om vishveshvarîm jagadhâtrîm, sthiti samhâra kârinîm*
*nidrâm bhagavatîm vishnora tulâm tejasaha prabhuha. 1*

ब्रह्मोवाच ।।

*Bhrahmovâca*

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिताः ।।

*tvam svâhâ tvam svadhâ, tvam hi vashat kâraha svarâtmikâ*
*sudhâ tvamakshare nitye tridhâ mâtrât mikâ sthitâ. 2*

अर्ध मात्रा स्थिता नित्या यानुच्चार्या विशेषतः ।
त्वमेव संध्या सावित्री त्वं देवि जननीपरा ।। ३ ।।

*Ardha mâtrâ sthitâ nityâ, yânuccâryâ visheshataha*
*tvameva sandhyâ sâvitrî, tvam devi jananî parâ. 3*

त्वयैतद्धार्यते विश्वं त्वयैतत् सृज्यते जगत् ।
त्वयैतत् पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ।।४।।

*Tvayaitad dhâryate vishvam tvayaitat srijyate  jagat*
*tvayaitat pâlyate devi tvamatsyante ca sarvadâ. 4*

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ।।५।।

*visrishtau srishti rûpâ tvam, sthitirupâ ca pâlane*
*tathâ samhriti rupânte jagato asya jaganmaye. 5*

महाविद्या महामाया महामेधा महास्मृतिः ।
महामोहा च भवती महादेवी महासुरी ।।६।।

*Mahâ vidyâ mahâ mâyâ mahâ medhâ mahâ smritiha*
*Mahâ mohâ ca bhavatî, mahâdevî mahâsurî. 6*

प्रकृतिस्त्वं च सर्वस्य गुणत्रय विभाविनी ।
कालरात्रि महारात्रिर्मोहरात्रिश्च दारुणा ॥७॥

*Prakritis tvam ca sarvasya, guntraya vibhâvinî*
*Kâla râtri mahâ râtrir moha râtrirshca dârûnâ. 7*

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥८॥

*tvam srîs tvamîshvarî tvam, hrîstvam buddhir bodha lakshanâ*
*lajjâ pushtis tathâ tushtistvam shântiaha kshântireva ca, 8*

खड्गिनी शूलिनी घोर। गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी, बाणभुशुण्डी परिघायुधा ॥९॥

*khadginî shûlinî ghorâ, gadinî cakrinî tathâ*
*shankhinî câpinî, bâna bhushundî pari ghâyudhâ. 9*

सौम्या सौम्य तराशेष सौम्येभ्यस्त्वति सुन्दरी ।
परापराणां परमा त्वमेव परमेश्वरी ॥१०॥

*saumyâ saumya tarâshesha, saumye bhyastvati sundarî*
*parâ parânâm paramâ, tvameva parameshvarî, 10*

यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्वस्य या शक्तिः, सा त्वं किं स्तूयसे तदा ॥११॥

*yacca kiñcit kvaci dvastu sada sadvâ khilât mike*
*tasya sarvasya yâ shaktiha sâ tvam kim stûyase tadâ. 11*

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥१२॥

*yayâ tvayâ jagat srashtâ jagat pâtyatti yo jagat*
*so api nidrâ vasham nîtaha, kastvâm stótu miheshvaraha. 12*

विष्णुः शरीर ग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥१३॥

*vishnuha sharîra grahanama hamîshâna eva ca*

*kâritâste yato atastvâm kaha stotum shaktimân bhavet. 13*

**सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।**
**मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ।।१४।।**

*sâ tvamittham prabhâvaih svairudârairdevi samstutâ*
*mohayaitau durâdharshâvasurau madhukaitabhau. 14*

**प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ।**
**बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ।।१५।।**

*prabhodam ca jagat svâmî nîyatâmac yutó laghu*
*bodhashca kriya tâmasya hantu metau mahâsurau. 15*

*Ohm Durgaye Namaha*

********************

## इति रात्रि सूक्तं

***Iti ratri suktam***

## ॥अथ नवार्णविधिः॥

*atha navârna vidhi*

**॥विनियोगः॥**

*viniyogah*

**श्रीगणपतिर्जयति।**

*Srî Ganapatir jayati*

**ॐ अस्य श्रीनवार्णमन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः, गायत्र्युष्णिगनुष्टुभश्छन्दांसि, श्री महाकाली महालक्ष्मी महासरस्वत्यो देवताः, ऐं बीजम्, ह्रीं शक्तिः, क्लीं कीलकम्, श्रीमहाकाली महालक्ष्मी महासरस्वती प्रीत्यर्थे जपे विनियोगः।**

*Ôm asya shrînavârna mantrasya, shrî brahma,vishnu,rudrâ rishayaha, gâyatryushnaga anushtubhash chandâmsi, shrî mahâkâlî mahâlakshmî mahâsarasvatyo devatâha, aim bîjam, hrim shaktiha, klîm kîlakam, shrîmahâkâli mahâlakshmî mahâsarasvatî prîtyarthe jape viniyogaha.*

**॥ऋष्यादिन्यासः॥**

*rishyâdi nyâsaha*

**ब्रह्मविष्णुरुद्रऋषिभ्यो नमः,शिरसि ।**

*brahma vishnurudra rishibhyo namaha,shirasi.*

**गायत्र्युष्णिगनुष्टुप्छन्दोभ्यो नमः,मुखे।**

*Gâyatryushni ganushtupchando bhyo namah, mukhe.*

**महाकाली महालक्ष्मी महासरस्वती देवताभ्यो नमः, हृदि।**

*mahâkâlî mahâ lakshmî mahâ sarasvatî devatâbhyo namaha, hridi.*

**ऐं बीजाय नमः, गुह्ये।**

*aim bîjâya namaha,guhayé,*

**ह्रीं शक्तये नमः, पादयोः।**

*hrim shaktaye namaha,pâdyoha.*

**क्लीं कीलकाय नमः, नाभौ।**

*klîm kîlakâya namah,nabhau*

**ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे**

*ôm aim hrîm klîm câmundâyai vicce*

**॥करन्यासः॥**

*karanyâsah*

**ॐ ऐं अङ्गुष्ठाभ्यां नमः।**

*ôm aim angushthâbhyâm namaha*

ॐ ह्रीं तर्जनीभ्यां नमः।
*ôm hrim tarjanîbhyâm namaha*
ॐ क्लीं मध्यमाभ्यां नमः।
*ôm klîm madhya mâbhyâm namaha*
ॐ चामुण्डायै अनामिकाभ्यां नमः।
*ôm câmundâyai anâmikâbhyâm namaha*
ॐ विच्चे कनिष्ठिकाभ्यां नमः।
*ôm vicce kanishtikâbhyâm namaha*
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतलकर पृष्ठाभ्यां नमः।
*ôm aim hrîm klîm câmundâyai vicce*
*karatala kara prishthâ bhyâm namaha*

॥हृदयादि न्यासः ॥
*hridayâdi nyâsaha*

ॐ ऐं हृदयाय नमः ।
*ôm aim hridayâya namaha*
ॐ ह्रीं शिरसे स्वाहा ।
*ôm hrim shirase svâhâ*
ॐ क्लीं शिखायै वषट् ।
*ôm klîm shikhâyai vashat*
ॐ चामुण्डायै कवचाय हुम् ।
*ôm câmundâyai kavacâya hum*

ॐ विच्चे नेत्रत्रयाय वौषट्।
*ôm vicce netra tray-aay vaushat*
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट्।
*ôm aim hrîm klîm câmundâyai vicce astrâya phat*

## ॥अक्षरन्यासः॥
**aksharanyâsaha**

ॐ ऐं नमः, शिखायाम् ।

*ôm aim namah, shikhâyâm*

**ॐ ह्रीं नमः, दक्षिणनेत्रे ।**

*ôm hrîm namaha, dakshinanetre*

**ॐ क्लीं नमः, वामनेत्रे ।**

*ôm klim namaha, vâmanetre*

**ॐ चां नमः, दक्षिणकर्णे ।**

*ôm câm namaha, dakshinakarne*

**ॐ मुं नमः, वामकर्णे ।**

*ôm mum namaha, vâmakarne*

**ॐ डां नमः, दक्षिणनासापुटे ।**

*ôm dâm namaha, dakshinanâsâpute*

**ॐ यैं नमः, वामनासापुटे ।**

*ôm yaim namaha, vâmanâsâpute* (linker neusgat)

**ॐ विं नमः, मुखे।**

*ôm vim namaha,  mukhe*

**ॐ च्चें नमः, गुह्ये**

*ôm ccém namaha, guhayé*

*aim hrîm klîm câmundayai vicce*
*Evam vinyasyâshta vâram mulen vyâpakam kuryât*

## ॥दिङ्न्यासः॥

*Dignyâsah*

**ॐ ऐं प्राच्यै नमः।**

*ôm aim prâcyai namaha*

**ॐ ऐं आग्नेय्यै नमः।**

*ôm aim âgneyyai namaha*

ॐ ह्रीं दक्षिणायै नमः।
*ôm hrîm dakshinâyai namaha*
ॐ ह्रीं नैर्ऋत्यै नमः।
*ôm hrîm nairrutyai namaha*
ॐ क्लीं प्रतीच्यै नमः।
*ôm klîm pratîcyai namaha*
ॐ क्लीं वायव्यै नमः।
*ôm klîm vâyavyai namaha*
ॐ चामुण्डायै उदीच्यै नमः।
*ôm câmundâyai udîccyai namaha*
ॐ चामुण्डायै ऐशान्यै नमः।
*ôm câmundâyai eshânyai namaha*
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ऊर्ध्वायै नमः।
*ôm aim hrîm klîm câmundâyai vicce urdhvâyai namaha*
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे भूम्यै नमः।
*ôm aim hrîm klîm câmundâyai vicce bhûmyai namaha*

## ॥ध्यानम्॥
*dhyânam*

ॐ खड्गं चक्र गदेषु चाप परिघाञ्छूलं भुशुण्डीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गं भूषावृताम् ।
नीलाश्मद्युतिमास्य पाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥१॥

*ôm khadgam cakra gadeshu câpa*
*pari ghâñ chulam bhushundîm shiraha,*
*shankham sandadhatîm karaistri nayanâm*
*sarvângam bhûshâ vritâm,*

*nîlâsh madyuti mâsya pâdadashakâm sévé mahâ kâlikâm*
*yâmas tautsvapite harau kamalajo hantum madhum kaitabham.*

**ॐ अक्षस्रक्परशुं गदेषु कुलिशं पद्मं धनुष्कुण्डिकां**
**दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम्।**
**शूलं पाश सुदर्शने च दधतीं हस्तैः प्रसन्नाननां**
**सेवे सैरिभ मर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्॥२॥**

*ôm akshas rakparashum gadeshu kulisham*
*padmam dhanush kundikâm*
*dandam shaktimasim ca carma jalajam ghantâm*
*surâbhâjanam shûlam pâsha sudarshane ca dadhatîm*
*hastaih prasan nânanâm*
*seve sairibha mardinî miha mahâlakshmîm sarojasthitâm.*

**ॐ घण्टा शूलहलानि शङ्खमुसले चक्रं धनुः सायकं**
**हस्ताब्जैर्दधतीं घनान्त विलसच्छीतांशु तुल्यप्रभाम् ।**
**गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा**
**पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्॥३॥**

*ôm ghantâ shûlaha lâni shankha*
*musale cakram dhanuh sâyakam*
*hastâbjair dadhatîm ghanânta vilasacchî tâmshu tulya prabhâm*
*gaurî deha samud bhavâm trijagatâm âdhâra bhutâm mahâ*
*pûrvâmatra sarasvatî manubhaje shumbhâdi daityâr dinîm II*

**ॐ मां माले महामाये सर्वशक्ति स्वरूपिणि ।**
**चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥**
**ॐ अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे।**
**जपकाले च सिद्ध्यर्थं प्रसीद मम सिद्धये॥**

ॐ अक्षमालाधिपतये सुसिद्धिं देहि देहि
सर्वमन्त्रार्थसाधिनि
साधय साधय सर्वसिद्धिं परिकल्पय परिकल्पय मे
स्वाहा।

*ôm mâm mâye mahâ mâye sarvashakti svarûpini*
*catur vargastvayi nyastastas mânme siddhidâ bhava.*
*ôm avighnam kuru mâle tvam grihanâmi dakshine kare*
*japakâle ca siddhyartham prasîda mama siddhaye,*
*ôm aksha mâlâ dhipataye susiddhim dehi*
*dehi sarvamantrârtha sâdhini*
*sâdhay sâdhay sarva siddhim pari kalpaya*
*pari kalpaya me svâhâ.*

**mantrajâp 108 x *navârna mantra:***

ॐ ऐं ह्रीं क्लींचामुण्डायै विच्चे

*ôm aim hrîm klîm câmundâyai vicce*

ॐ गुह्याति गुह्य गोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥

*ôm guhayâti guhya goptrî tvam, grihânâs matkritam japam*
*siddhir bhavatu me devi tvat prasâdân maheshvari.*

*Devi Maa ki Jai*

## अथ सप्तश्लोकी दुर्गा

### Ath Saptaslokî Durgâ

शिव उवाच

देवी त्वं भक्त सुलभे सर्व कार्य विधायिनी ।

कलौ ही कार्य सिद्ध्यर्थम उपायम ब्रूहि यत्नतः ॥

*Shiva uvâcha*
*devi tvam bhakta sulabhe sarva kârya vidhâyini,*
*kalau hî kârya siddhyar tham upâyam bruhi yatnataha.*

देवी उवाच

शृणु देव प्रवक्ष्यामि कलौ सर्वेष्ट साधनं ।

मया तवैव स्नेहेन प्यम्बा स्तुतिः प्रकाश्यते ॥

*Devi uvâcha*
*shrunu deva pravak shyâmi kalau sarvéshta sâdhanam,*
*mayâ tavaiva snéhéna, pyambâ stutiha prakâshyaté.*

ॐ अस्य श्री दुर्गा सप्तश्लोकी स्तोत्र मंत्रस्य

नारायण ऋषि:, अनुष्टुप छन्द:, श्री महा काली महा लक्ष्मी

महा सरस्वत्यो देवता:, श्री जगदम्बा प्रीत्यर्थ पाठे

विनियोगः ॥

ॐ ज्ञानी नामपि चेतांसि देवी भगवती हि सा ।
बाला दाकृष्य मोहाय महा माया प्रयच्छाति ॥१॥
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्रयदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द चित्ता ॥२॥
सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥३॥
शरणागतदीनार्तपरित्राणपरायणे ।

सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥४॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवी नमोऽस्तु ते ॥५॥
रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥६॥
सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरि विनाशनम् ॥७॥

## *इत्ती श्री सप्तश्लोकी दुर्गा संपूर्णा*

*Om asya shrî durgâ sapta shlokî stotra mantrasya*
*Nârâyan Rishiha, Anushthupa chhandaha,*
*Shrî Mahâkâli Mahâlaksmi Mahâsarasvatyo Devatâha,*
*Shrî Durga prîtjartham saptaslokî durgâ pâthe viniyogaha.*

*Om gyâni nâmapi chetâmsi devi bhagavatî hi sâ,*
*Balâ dâkrishya Mohâya mahâ mâyâ prayachhati . 1*

*Durgé smritâ harsî bhîtim shésh jantoha*
*Svasthaiha smritâ matî matîva shubhâm dadâsi ,*
*Dâridraya duhkha bhaya hârini kâ tvadanyâ*
*Sarvópa kâra karanâya sadârdra chittâ. 2*

*Sarva mangala mângalyé, shivé sarvârtha sâdhiké,*
*Sharanyé trayambaké gauri nârâyani namó astuté. 3*

*Sharnâgata dînârta paritrâna parâyané,*
*Sarva sjârti haré devi nârâyani namó astuté. 4*

*Sarva svarôpé sarvéshé sarva shakti samanvîté,*
*Bhayé bhyastrâhi no devi durgé devi namó astuté.5*

*Rogân Shésân apahamsi tusttâ, rusttâ tu kâmân sakalân bhisttân,*
*Tvâm âshritânâm na vipann rânâm, tvâm âshritâ hyâshrayatâm prayânti. 6*

*Sarvâ bâdhâ prashmanam trailókya syâkhiléshvari,*
*Evaméva tvayâ kâryam asmad vairi vinâshanam.7*
***Iti srî saptaslokî durgâ sampûrna***

# देव्यपराधक्षमापन स्तोत्रम्

## Dévya aparâdha kshamâpana stotram

**न मत्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो**
**न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।**
**न जाने मुद्रास्ते तदपि च न जाने विलपनं**
**परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥१॥**

*na matram no yantram tadapi ca na jâne stutimaho*
*na câhvânam dhyânam tadapi ca na jâne stuti kathâha*
*na jâne mudrâste tadapi ca na jâne vilapanam*
*param jâne mâta stvadanu saranam klesha haranam. 1*

**विधेरज्ञानेन द्रविणविरहेणालसतया**
**विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।**
**तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे**
**कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥२॥**

*vidhera jñânena dravina virahenâ lasatayâ*
*vidheyâshakya tvâttava carana yoryâ cyutirabhût*
*tadetat kshantavyam janani sakalod dhârini shive*
*kuputro jâyeta kvacidapi kumâtâ na bhavati. 2*

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तवसुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३॥

*prithi vyâm putrâste janani bahavah santi saralâha*
*param teshâm madhye virala tara ló aham tavasutaha*
*madîyo ayam tyâgaha samucitam idam no tava shive*
*kuputro jâyeta kvaci dapi kumâtâ na bhavati. 3*

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥४॥

*jagan mâtar mâtastava caranasevâ na racitâ*
*na vâ dattam devi dravinamapi bhûyastava mayâ*
*tathâpi tvam sneham mayi nirûpamam yatprakurûshe*
*kuputro jâyeta kvac idapi kumâtâ na bhavati. 4*

परित्यक्ता देवा विविधविधसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥५॥

*parityaktâ devâ vividha vidha sevâ kulatayâ*
*mayâ pañcâshî teradhikama panîte tu vayasi*
*idânîm cen mâtastava yadi kripâ nâpi bhavitâ*
*nirâlambo lambodara janani kam yâmi sharanam.5*

श्वपाको जल्पाको भवति मधु पाको पमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं

जनः को जानीते जननि जपनीयं जपविधौ ॥६॥

*shvapâko jalpâko bhavati madhu pâko pamagirâ*
*nirâtangko rangko viharati ciram koti kanakaiha*
*tavâparne karne vishati manuvarne phalam idam*
*janaha ko jânîté janani japanîyam japavidhau. 6*

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहण परिपाटी फलमिदम् ॥७॥

*citâ bhas mâlepo garala mashanam dikpata dharo*
*jatâdhârî kanthe bhu jaga patihârî pashupatiha*
*kapâlî bhûtesho bhajati jaga dîshaika padavîm*
*bhavâni tvat pâni grahana pari pâtî phalamidam. 7*

न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे,
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥८॥

*na mokshasyâ kângkshâ bhava vibhava vâñchâpi ca na mé*
*na vijñânâ pekshâ shashimukhi sukheéchhâpi na punaha*
*atastvâm samyâce janani jananam yâtu mama vai*
*mridânî rudrânî shiva shiva bhavânîti japataha. 8*

नाराधितासि विधिना विविधोपचारैः,
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे,
धत्से कृपामुचितमम्ब परं तवैव ॥९॥

*nârâ dhitâsi vidhinâ vividhopacâraih*
*kim rûksha cintana parairna kritam vacobhiha*
*shyâme tvameva yadi kiñcana mayya nâthe*

*dhatse kripâ mucita mamba param tavaiva. 9*

**आपत्सु मग्नः स्मरणं त्वदीयं, करोमि दुर्गे करुणार्णवेशि ।**

**नैतच्छठत्वं मम भावयेथाः,**

**क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥**

*âpatsu magnaha smaranam tvadîyam*
*karomi durge karûnâr naveshi*
*naitaccha thatvam mama bhâva yethâh*
*kshudhâ trishârtâ jananîm smaranti. 10*

**जगदम्ब विचित्रमत्र किं ,परिपूर्णा करुणास्ति चेन्मयि ।**

**अपराधपरम्परापरं ,न हि माता समुपेक्षते सुतम् ॥११॥**

*jagadamba vicitramatra kim, paripûrnnâ karunâsti cenmayi*
*aparâdha param parâparam, na hi mâtâ samu pekshate sutam.*

**मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।**
**एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ॥१२॥**

*matsamah pâtakî nâsti pâpaghnî tvatsamâ nahi*
*evam jñyâtvâ mahâdevi yathâyogyam tathâ kuru. 12*

**Devya Aparadh Kshama Stotram Sampoorna**

*Ohm Durgaye Namaha*
*****************************

# भगवती स्तोत्रं

***Bhagavatî Stotram***

**जय भगवति देवि नमो वरदे**
**जय पाप विनाशिनि बहुफलदे ।**
**जय शुम्भनिशुम्भकपालधरे**
**प्रणमामि तु देवि नरार्तिहरे ॥१॥**

*Jaya bhagavati devi namo varade,*
*jaya pâpa vinâshini bahu phalade*
*Jaya shumbha nishumbha kapâla dhare*
*pranamâmi tu devi narârtihare.*

**जय चन्द्रदिवाकर नेत्रधरे**
**जय पावक भूषितवक्त्रवरे ।**
**जय भैरवदेहनिलीनपरे**
**जय अन्धकदैत्य विशोषकरे ॥२॥**

*Jaya candra divâkara netra dhare,*
*jaya pâvaka bhûshita vaktravare*
*Jaya bhairava deha nilînapare*
*jaya andhaka daitya vishosha kare.*

**जय महिषविमर्दिनि शुलकरे**
**जय लोकसमस्तक पापहरे ।**
**जय देवि पितामहविष्णुनते**
**जय भास्कर शक्रशिरोऽवनते ॥३॥**

*Jaya mahisha vimardini shulakare,*
*jaya loka samastaka pâpa hare*
*Jaya devi pitâmaha vishnunate*

jaya bhâskara shakrashiro avanate. 3

जय षण्मुख सायुध ईशनुते
जय सागरगामिनि शम्भुनुते
जय दुःख दरिद्र विनाश करे
जय पुत्रक लत्र विवृद्धिकरे ॥४॥

Jaya shanmukha sâyudha îshanute,
jaya sâgara gâmini shambhu nute
Jaya duhkha daridra vinâshakare
jaya putraka latra vivriddhi kare.4

जय देवि समस्त शरीर धरे
जय नाक विदर्शिनि दुःखहरे ।
जय व्याधि विनाशिनि मोक्षकरे
जय वाञ्छितदायिनि सिद्धिवरे ॥५॥

Jaya devi samasta sharîra dhare
jaya nâka vidarshini duhkha hare
jaya vyâdhi vinâshini moksha kare,
jaya vâñchita dâyini siddhivare. 5

एतद्व्यासकृतं स्तोत्रं यः पठेन्नियतः शुचि ।
गृहे वा शुद्धभावेन प्रीता भगवती सदा ॥६॥

Etadvyâsa kritam stotram yaha pathenniyataha shuci
grihe vâ shuddha bhâvena prîtâ bhagavatî sadâ. 6

*******************************

# भवान्यष्टकम्

***bhavanyashtakam***

**न तातो न माता न बन्धुर्न दाता,**
**न पुत्रो न पुत्री न भृत्यो न भर्ता ।**
**न जाया न विद्या न वृत्तिर्ममैव ,**
**गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥१॥**

*na tâto na mâtâ na bandhur na dâtâ,*

*na putro na putrî na bhrityo na bhartâ*
*na jâyâ na vidyâ na vrittir mamaiva*
*gatistvam gatistvam tvamekâ bhavâni. 1*

**भवाब्धावपारे महादुःखभीरु,**
**पपात प्रकामी प्रलोभी प्रमत्तः ।**
**कुसंसारपाशप्रबद्धः सदाहं,**

**गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥२॥**

*Bhavâbdhâva pâre mahâ duhkha bhîru*
*papâta prakâmî pralobhî pramattah*

*kusam sâra pâsha prabaddhah sadâham*
*gatistvam gatistvam tvamekâ bhavâni. 2*

**न जानामि दानं न च ध्यानयोगं,**
**न जानामि तन्त्रं न च स्तोत्रमन्त्रम् ।**
**न जानामि पूजां न च न्यासयोगं,**
**गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥३॥**

*na jânâmi dânam na ca dhyâna yogam*
*na jânâmi tantram na ca stotra mantram*

*na jânâmi pûjâm na ca nyâsa yogam*
*gatistvam gatistvam tvamekâ bhavâni. 3*

न जानामि पुण्यं न जानामि तीर्थ,
न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वापि मातर

गतिस्त्वं,गतिस्त्वं त्वमेका भवानि ॥४॥

*na jânâmi punyam na jânaami tîrtha*
*na jânâmi muktim layam vâ kadâcit*
*na jânâmi bhaktim vratam vâpi mâtar gatistvam*
*gatistvam gatistvam tvamekâ bhavâni. 4*

कुकर्मी कुसङ्गी कुबुद्धिः कुदासः
कुलाचारहीनः कदाचारलीनः ।
कुदृष्टिः कुवाक्यप्रबन्धः सदाहं,

गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥५॥

*kukarmî kusanggî kubuddhih kudâsah*
*kulâcâra hînah kadâ câralînah*
*kudrshtiha kuvâkya prabandhaha sadâham*
*gatistvam gatistvam tvamekâ bhavâni. 5*

प्रजेशं रमेशं महेशं सुरेशं ,
दिनेशं निशीथेश्वरं वा कदाचित् ।
न जानामि चान्यत् सदाहं शरण्ये ,
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥६॥

*prajesham ramesham mahesham suresham*
*dinesham nishîthaishvaram vâ kadâcit*

*na jânâmi cânyat sadâham sharanye*
*gatistvam gatistvam tvamekâ bhavâni.6*

विवादे विषादे प्रमादे प्रवासे,
जले चानले पर्वते शत्रुमध्ये ।
अरण्ये शरण्ये सदा मां प्रपाहि,
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥७॥

*vivâde vishâde pramâde pravâse*
*jale canale parvate shatru madhye*
*aranye sharanye sadâ mâm prapâhi*
*gatistvam gatistvam tvamekâ bhavâni. 7*

अनाथो दरिद्रो जरारोगयुक्तो,
महाक्षीणदीनः सदा जाड्यवक्त्रः ।
विपत्तौ प्रविष्टः प्रनष्टः सदाहं ,
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥८॥

*anâtho daridro jarâ roga yukto*
*mahâ kshîna dînaha sadâ jâdyavaktrah*
*vipattau pravishtah pranashtah sadâham*
*gatistvam gatistvam tvamekâ bhavâni . 8*

******************************

# श्री दुर्गा चालीसा

## Shrî Durgâ Câlîsâ

**नमो नमो दुर्गे सुख करनी । नमो नमो अम्बे दुःख हरनी ॥**

*namo namo durge sukha karanî*
*namo namo ambe dukha haranî 1.*

**निरंकार है ज्योति तुम्हारी । तिहूं लोक फैली उजियारी ॥**

*nirankâra hai jyoti tumhârî*
*tihûn loka phailî ujiyârî 2.*

**शशि ललाट मुख महा विशाला।नेत्र लाल भृकुटी विकराला ॥**

*shashi lalât mukha mahâ vishâlâ*

*netra lâla bhrikutî vikarâlâ*

**रूप मातु को अधिक सुहावे।दरश करत जन अति सुख पावे॥**

*rûpa mâtu ko adhika suhâve*

*darasha karata jana ati sukha pâve*

**तुम संसार शक्ति लय कीना । पालन हेतु अन्न धन दीना ॥**

*tuma samsâra shakti laya kînâ*
*pâlana hetu anna dhana dînâ*

**अन्नपूरना हुई जग पाला । तुम ही आदि सुन्दरी बाला ॥**

*annapûrnâ huî jaga pâlâ*
*tuma hî âdi sundarî bâlâ.*

**प्रलयकाल सब नाशन हारी । तुम गौरी शिव शंकर प्यारी ॥**

*Pralaya kâla saba nâshana hârî*
*tuma gaurî shiva shankara pyârî*

शिव योगी तुम्हरे गुण गावैं । ब्रह्मा विष्णु तुम्हें नित ध्यावैं ॥

*shiva yogî tumhare guna gâvain*
*brahmâ vishnu tumhen nita dhyâvain*

रूप सरस्वती को तुम धारा । दे सुबुद्धि ऋषि मुनिन उबारा ॥

*rûpa sarasvatî ko tuma dhârâ*
*de subuddhi rishi munina ubâra*

धरा रूप नरसिंग को अम्बा । परगट भई फाड़ कर खम्बा ॥

*dharâ rûpa narasinga ko ambâ*
*paragat bhaî phâr kara khambâ*

रक्षाकरि प्रहलाद बचायो । हिरणाकुश को स्वर्ग पठायो ॥

*rakshâkari prahalâda bachâyo*
*hiranâkusha ko svarga pathâyo.*

लक्ष्मी रूप धरो जग माहीं । श्री नारायण अंग समाहीं ॥

*Lakshmî rûpa dharo jaga mâhîn*
*shrî nârâyana anga samâhîn*

क्षीरसिन्धु में करत विलासा । दया सिंधु दीजै मन आसा ॥

*kshîrasindhu men karata vilâsâ*
*dayâ sindhu dîjai mana âsâ*

हिंगलाज में तुम्हीं भवानी । महिमा अमित न जात बखानी ॥

*hingalâja men tumhîn bhavânî*
*mahimâ amita na jâta bakhânî*

मातंगी धूमावती माता । भुवनेश्वरी बगला सुख दाता ॥

*mâtangî dhûmâvatî mâtâ*
*bhuvaneshvarî bagalâ sukha dâtâ*

श्री भैरव तारा जग तारिणी।छिन्न भाल भव दुःख निवारिणी ॥

*shrî bhairava târâ jaga târinî*
*chinna bhâla bhava duhkha nivârinî*

केहरि वाहन सोह भवानी । लांगुर वीर चलतागवानी ॥
*kehari vâhana soha bhavânî*
*lângura vîra cala tâgavânî*

कर में खप्पर खड़ग विराजे । जाको देख काल डर भाजे ॥
*kara men khappara khadag virâje*
*jâko dekha kâla dara bhâje*

सोहे अस्त्र और त्रिशूला । जाते उठत शत्रु हिय शूला ॥

*sohe astra aura trishûlâ*
*jâte uthata shatru hiya shûlâ*

नाग कोटि में तुम्हीं विराजत । तिहूं लोक में डंका बाजत ॥

*nâga koti men tumhin virâjat*
*tihûn loka men dankâ bâjata*

शुम्भ निशुम्भ दानव तुम मारे । रक्तबीज शंखन संहारे ॥

*shumbha nishumbha dânava tuma mâre*
*raktabîja shankhana sanhâre*

महिषासुर नृपाति अभिमानी । जेहि अध भार मही अकुलानी ॥

*mahishâsura nripâti abhimânî*
*jehi adha bhâra mahî akulânî*

रूप कराल काली को धारा । सेन सहित तुम तिहि संहारा ॥

*rûpa karâla kâlî ko dhârâ*
*sena sahita tuma tihi sanhârâ*

परी गाढ़ सन्तन पर जब जब।भई सहाय मातु तुम तब तब ॥

*parî gârha santana para jaba jaba*
*bhaî sahâya mâtu tuma taba taba.*

अमर पुरी औरों सब लोका । तब महिमा सब रहे अशोका ॥

*amara purî auron saba lokâ*

*taba mahimâ saba rahe ashokâ*

बाला में है ज्योति तुम्हारी । तुम्हें सदा पूजें नर नारी ॥

*Bâlâ men hai jyoti tumhârî*

*tumhen sadâ pûjen nara nârî*

प्रेम भक्ति से जो जस गावै।दुःख दारिद्र निकट नहिं आवे ॥

*prema bhakti se jo jasa gâvai*
*duhkha dâridra nikata nahin âve*

ध्यावै तुम्हें जो नर मन लाई । जन्म मरण ताको छुटि जाई ॥

*dhyâvai tumhen jo nara mana lâî*
*janma marana tâko chuti jâî*

जोगी सुर मुनि कहत पुकारी। योग न हो बिन शक्ति तुम्हारी॥

*jogî sura muni kahata pukârî*
*yogâ na ho bina shakti tumhârî*

शंकर आचारन तप कीनों। काम अरु क्रोध जीति सब लीनों ॥

*shankara âcârana tapa kînon*
*kâma aru krodha jîti saba lînon*

निशि दिन ध्यान धरो शंकर को। काहु काल नहिं सुमिरो तुमको

*nishi dina dhyâna dharo shankara ko*
*kâhu kâla nahin sumiro tumako*

शक्ति रूप को मरम न पायो।शक्ति गई तब मन पछितायो ॥

*shakti rûpa ko marama na pâyo*
*shakti gaî taba mana pachitâyo*

शरणागत हुई कीर्ति बखानी। जय जय जय जगदम्ब भवानी ॥

*sharanâgata huî kîrti bakhânî*
*jaya jaya jaya jagadamba bhavânî*

भई प्रसन्न आदि जगदम्बा । दई शक्ति नहीं कीन विलम्बा ॥

*bhaî prasanna âdi jagadambâ*
*daî shakti nahín kîna vilambâ*

मोको मातु कष्ट अति घेरो । तुम बिन कौन हरे दुःख मेरो ॥

*moko mâtu kashta ati ghero*
*tuma bîna kauna hare duhkha mero*

आशा तृष्णा निपट सतावे । रिपु मुरख मोहि अति डरपावे ॥

*âshâ trishnâ nipata satâve*
*ripu murakha mohi ati darapâve*

शत्रु नाश कीजै महारानी । सुमिरौं इक चित तुम्हें भवानी ॥

*shatru nâsha kijai mahârânî*
*sumiraun ika cita tumhen Bhavânî*

करो कृपा हे मातु दयाला । ऋद्धि सिद्धि दे करहु निहाला ॥

*karo kripâ he mâtu dayâlâ*
*riddhi siddhi de karahu nihâlâ*

जब लगि जियौं दया फल पाऊँ। तुम्हरो जस मैं सदा सुनाऊँ ॥

*jaba lagi jiyaun dayâ phala páún*
*tumhro jasa main sadâ sunáún*

दुर्गा चालीसा जो गावैं । सब सुख भोग परम पद पावैं ॥

*Durgâ câlîsâ jo gâvain*

*saba sukha bhoga param pada pâvain*

देवीदास शरण निज जानी । करहु कृपा जगदम्ब भवानी ॥

*devîdâsa sharana nija jânî,*

*karahu kripâ jagadamba Bhavânî*

**Shrî Durgâ Câlîsâ samaapt**

# दुर्गा जी की आरती

## Durgâ ârtî

जय अम्बे गौरी मैया जय श्यामा गौरी ।

निसदिन तुमको ध्यावत हरि ब्रह्मा शिवरी।.जय ॥

*jaya ambe gaurî maiyâ jaya shyâmâ gaurî*

*nisadina tumako dhyâvata hari brahmâ shivarî || jaya ||*

माँग सिन्दूर विराजत टीको मृग मदको ।

उज्ज्वलसे दोउ नैना चन्द्रवदन नीको ॥ जय ॥

*mânga sindûra virâjata tîko mriga madako*

*Ujjvala sé dou nainâ candra vadana nîko || jaya ||*

कनक समान कलेवर रक्ताम्बर साजे ।

रक्तपुष्प गलेमाला कंठनपर साजे ॥ जय ॥

*kanaka samâna kalevara raktâmbara sâje*

*rakta pushpa gale mâlâ kanthan para sâje || jaya ||*

केहरि वाहन राजत खड्ग खपर धारी ।

सुरनर मुनिजन सेवत तिनके दुख हारी ॥ जय ॥

*kehari vâhana râjata khadaga khapar dhârî*

*Sura nara muni jana sevata tinake dukha hâri || || jaya||*

कानन कुण्डल शोभित नासाग्रे मोती ।

कोटिक चन्द्र दिवाकर सम राजत ज्योति ॥ जय ॥

*kânana kundala shobhita nâsâgre motî*

*kotika candra divâkara sama râjata jyotî || jaya ||*

**शम्भु निशम्भु बिडारे महिषासुर घाती ।**
**धूम्रविलोचन नैना निशदिन मदमाती ॥ जय ॥**

*shumbha nishumbha bidâre mahishâsura ghâtî |*
*dhûmra vilocana nainâ nishadina madamâtî || jaya ||*

**ब्रह्माणी रुद्राणी तुम कमला रानी ।**
**आगमनिगम बखानी तुम शिवपटरानी ॥ जय ॥**

*brahmânî rudrânî tuma kamalâ rânî*
*âgama nigama bakhânî tuma shiva patarânî || jaya ||*

**चौंसठ योगिन गावत नृत्य करत भैरूँ।**
**बाजत ताल मृदंग और बाजत डमरू ॥ जय ॥**

*causatha yoginî gâvata nritya karata bhairûn*

*bâjata tâla mridanga aura bâjata damarû ||jaya||*

**तुम हो जग की माता तुम ही हो भर्ता ।**
**भक्तन की दुख हर्ता सुख सम्पति कर्ता ॥ जय ॥**

*tuma hi jaga kî mâtâ tuma hî ho bhartâ*
*bhaktana kî dukha hartâ sukha sampati kartâ || jaya ||*

**भुजाचार अति शोभितवर मुद्रा धारी ।**

**मन वाँछित फल पावत देवता नर नारी ॥ जय ॥**

*bhujâcâra ati shobhita vara mudrâ dhârî*

*mana vâncita phala pâvata sevata nara nârî || jaya ||*

**कंचन थाल विराजत अगर कपूर बाती ।**

माल केतु में राजत कोटि रतन ज्योती ॥ जय ॥

*kancana thâla virâjata agaru kapûra bâtî |*
*mâla ketu men râjata koti ratana jyotî || jaya ||*

माँ अम्बे की आरती जो कोई नर गावे ।

कहत शिवानन्द स्वामी सुख सम्पति पावे ॥ जय ॥

*mâm ambe kî âratî jo koi nara gâve*
*kahata shivânanda svâmî sukha sampati pave*
*II jayaII*